इति भाषा। तस्य रूपान्तराणि। दद्रूः २ दद्रूः ३ दर्द्रूः ४। इति भरतधृतशब्दभेदः॥

तस्य लक्षणं यथा,—
"सकण्डुरागपिड़कं दद्रुमण्डलमुन्नतम्॥"
इति माधवकरः॥

तस्यौषधम् यथा,—
"विड़ङ्गैड़गजाकुष्ठनिशासिन्धूत्थसर्षपैः।
मूत्राम्बुपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः॥
प्रपुन्नाड़स्य वीजानि धात्री सर्ज्जरसः स्नुही।
सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम्॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत्।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च॥"
इति गारुड़े १७५ अध्यायः॥ * ॥
"एकश्च त्रिफलाभागस्तथा भागद्वयं शिव!।
सोमराजस्य वीजानां जग्धं पथ्या च दद्रुणुत्॥
अम्बुतक्रं सगोमूत्रं क्वथितं लवणान्वितम्।
कांस्यस्थं खरं लेपात कुष्ठदद्रुविनाशनम्॥
हरिद्रा हरितालञ्च दूर्व्वा गोमूत्रसैन्धवम्।
अयं लेपो हन्ति दद्रुं पामानं वै गरं तथा॥"
इति गारुड़े १६४ अध्यायः॥ * ॥
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं शकृत्पलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत्॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥"
इति च गारुड़े १६८ अध्यायः॥ * ॥

अथ दद्रुचिकित्सा।
"कुष्ठकृमिघ्नो दद्रुघ्नो निशासैन्धवसर्षपाः।
अम्लपिष्टः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः॥
दूर्व्वाभयासैन्धवचक्रमर्द्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः।
त्रिभिः प्रलेपैरपि बद्धमूलां
दद्रुञ्च कुष्ठञ्च विनाशयन्ति॥"
कुठेरकः ममरी इति लोके।
लोके गण्डिलकाख्या सिद्धार्थकञ्च स्नुहीक्षीरम्।
त्रयमिति समभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः॥
अष्टगुणे गोतक्रे तानि प्रक्षतानि संदध्यात्।
दिवसत्रितयादूर्द्ध्वं सम्यक् निष्पेषयेत्तानि॥
वन्योपलेन घृष्ट्वा दद्रूमालेपयेत्तेन।
सप्ताहाल्लेपोऽयं दद्रुकण्डूमवश्यं विनाशयति॥"
इति भावप्रकाशः॥

("लाक्षाकुष्ठं सर्षपाः श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य वीजम्
स्त्वेकस्थं तक्रपिष्टः प्रलेपो
दद्रूयुक्तो मूलकाद्बीजयुक्तः॥
सिन्धूद्भूतं चक्रमर्द्दस्य वीज-
मिच्छूद्भूतं केशरं तार्क्ष्यशैलम्।
पिष्टो लेपोऽयङ्कपित्थादसेन
दद्रून्मूर्णा नाशयत्येष योगः॥
हेमक्षीरी व्याधिघातः शिरीषो
निम्बः सर्ज्जो वत्सकः साजकर्णः।
शीघ्रं तीव्रा नाशयन्तीह दद्रूः
स्नानालेपोद्घर्षणेषु प्रयुक्ताः॥"
इति च सुश्रुते चिकित्सितस्थाने नवमेऽध्याये॥)

दद्रुकः, पुं, (दद्रुरेव। स्वार्थे कन्।) दद्रुरोगः। इति शब्दरत्नावली॥

दद्रुघ्नः, पुं, (दद्रुं दद्रुरोगं हन्तीति। हन+टक्।) चक्रमर्द्दकः। इत्यमरः। २।४।१४७॥ (यथा, भावप्रकाशे क्षुद्रकुष्ठचिकित्सायाम्।
"वाकुची चाथ दद्रुघ्नः पिचुमर्द्दो हरीतकी॥"
अस्य गुणा यथा,—
"दद्रुघ्नपत्रं दोषघ्नमम्लं वातकफापहम्।
कण्डूकासकृमिश्वासदद्रुकुष्ठप्रणुल्लघु॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

दद्रुणः, त्रि, (दद्रुरस्यस्येति। दद्रु+"लोमादि-पामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इति नः।) दद्रुरोगी। इत्यमरः। २।६।५६॥

दद्रुनाशिनी, स्त्री, (दद्रुं नाशयतीति। नश+णिच+णिनिः। ङीप्।) तैलिनीकीटः। इति राजनिर्घण्टः॥

दद्रुरोगी, [न्] त्रि, (दद्रुरोगोऽस्यस्येति। दद्रु-रोग+इनिः।) दद्रुरोगविशिष्टः। देदुया इति भाषा। तत्पर्य्यायः। दद्रुणः २। इत्यमरः। २।६।५६॥

दद्रूः, पुं, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति। दरिद्रा+"दरिद्राते र्यालोपश्च।" उणां १।८२। इति ऊः रकारेकाराकाराणां लोपश्च।) दद्रुः। इत्यमरटीकायां भरतः॥

दद्रूघ्नः, पुं, (दद्रूं हन्तीति। हन+टक्।) दद्रुघ्नः। इति शब्दरत्नावली॥

दद्रूणः, त्रि, (दद्रूरस्यस्येति। दद्रू+पामादित्वात् नः।) दद्रुणः। इत्यमरटीकायां रमानाथः॥

दध, ङ ददे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, दधते। ददे दानधृत्योः। आदध्यादन्धकारे रतिमतिशयिनीमिति मयूर-भट्टोक्तम्। गणकृतानित्यात् अस्यैव ढौपरस्मैपद-साध्यत्वमिति रमानाथः। वस्तुतस्तु डु धाञ् धारणे इत्यस्यैव रूपं साध्यम्। इति दुर्गादासः॥

दधि, क्ली, (दधातीति। धा+"भाषायां धाञ्कृ-सृगमिजनिनमिभ्यः।" ३।२।१७१। इत्यस्य वार्त्तिकोक्त्या किः स च लिड्वत्।) श्रीवासः। वसनम्। इति शब्दरत्नावली॥ क्षीरोत्तरा-वस्थाभावः। दइ इति भाषा। तत्पर्य्यायः। क्षीरजम् २ मङ्गल्यम् ३ विरलम् ४। इति राजनिर्घण्टः॥ पयस्यम् ५। घनेतरत् दधि द्रप्सम्। इत्यमरः॥ अस्य गुणाः। अम्लत्वम्। गुरुत्वम्। वातदोषशमनत्वम्। संग्राहित्वम्। मूत्रावहत्वम्। बल्यत्वम्। शोफकफार्त्तिरुच्य-शमनत्वम्। वह्निशान्तिकारित्वम्। कासश्वास-पीनसविषमज्वरशीतज्वरहितत्वम्। रक्तोद्रेक-शुक्रवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ उष्ण-त्वम्। दीपनत्वम्। स्निग्धत्वम्। कषायानुरस-त्वम्। पाकेऽम्लत्वम्। पित्तमेदःप्रदत्वम्। मूत्र-कृच्छ्रप्रतिश्यायातीसाररुचिकार्श्येषु शस्तत्वञ्च। इति भावप्रकाशः॥ स्वादुत्वम्। हृद्यत्वम्। रोचनत्वम्। मङ्गल्यत्वम्। इति राजवल्लभः॥ * ॥

अथ पक्वदुग्धदधिगुणाः। रुच्यत्वम्। स्निग्धत्वम्। उत्तमगुणत्वम्। पित्तानिलापहत्वम्। सर्व्व-धात्वग्निबलवर्द्धनत्वञ्च॥ * ॥

निःसारदुग्धदधिगुणाः। संग्राहित्वम्। शीतल-त्वम्। वातलत्वम्। लघुत्वम्। विष्टम्भित्वम्। दीपनत्वम्। रुच्यत्वम्। ग्रहणीरोगनाशित्वञ्च॥ * ॥

बद्धदधिगुणाः। सुस्निग्धत्वम्। मधुरत्वम्। नातिपित्तकरत्वञ्च॥ * ॥

शर्करासहितदधिगुणाः। श्रेष्ठत्वम्। तृष्णा-पित्तास्रदाहनाशित्वञ्च॥ * ॥

गुड़युक्तदधिगुणाः। वातनाशित्वम्। वृष्यत्वम्। वृंहणत्वम्। तर्पणत्वम्। गुरुत्वञ्च। इति भाव-प्रकाशः॥ * ॥

वातजतृष्णानाशित्वम्। इति चक्रदत्तः॥ * ॥

रात्रौ दधिसेवने विशेषो यथा, रात्रौ दधि न भुञ्जीत किन्तु सघृतशर्करं समुद्गसूपं सक्षौद्रं उष्णं सामलकं भुञ्जीत। रक्तपित्तकफोत्थेषु विकारेषु च अम्बुघृतान्वितमपि दधि न हितम्॥ ऋतुविशेषे विधिनिषेधौ। हेमन्तशिशिरवर्षासु दधि शस्तं शरद्ग्रीष्मवसन्तेषु प्रायशो विगर्हि-तम्॥ * ॥

अविधिना दधिसेवने दोषः। ज्वरास्रकपित्त-वीसर्पकुष्ठपाण्डुभ्रमकामलारोगप्राप्तिः॥ * ॥

अथ गोदधिगुणाः। विशेषस्वादुत्वम्। बल्य-त्वम्। रुचिप्रदत्वम्। पवित्रत्वम्। दीपनत्वम्। स्निग्धत्वम्। पुष्टिकारित्वम्। वायुनाशित्वम्। अशेषदधिमध्ये गुणाधिकत्वञ्च॥ * ॥

माहिषदधिगुणाः। सुस्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वम्। स्वादुपाकित्वम्। अभि-ष्यन्दित्वम्। गुरुत्वम्। रक्तकफदूषणत्वञ्च॥ * ॥

छागीदधिगुणाः। उत्तमत्वम्। ग्राहित्वम्। त्रिदोषनाशित्वम्। श्वासकासार्शःक्षयकार्श्येषु शस्तत्वम्। दीपनत्वञ्च। इति भावप्रकाशः॥ * ॥

आविकदधिगुणाः। दुर्नामकफव्याधिप्रकोपन-त्वम्॥ अश्वीदधिगुणाः। वातनाशित्वम्। दीपनत्वम्। चक्षुर्हितत्वञ्च॥ * ॥

औष्ट्रकदधिगुणाः। क्षारत्वम्। अत्यम्लत्वम्। कटुपाकित्वञ्च॥ * ॥

हस्तिनीदधिगुणाः। वीर्य्योष्णत्वम्। कषाय-त्वम्। कफवातनाशित्वञ्च॥ * ॥

मानुष्यदधिगुणाः। मधुरत्वम्। बल्यत्वम्। स्निग्धत्वम्। सन्तर्पणत्वञ्च। इति राजवल्लभः॥ * ॥

अथ दधिभेदाः।
"आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम्।
अम्लञ्चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा॥" * ॥
मन्दादीनां लक्षणानि गुणाश्च।
"मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत्।